05-10-2020

शास्त्री I

संस्कृतव्याकरणम् ।
अनिवार्यविषयः ।

धातुरूपाणि

दिवादिगणीयः { दिव् = (क्रीडा) )

| लकाराः पु॰ | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| लट् | प्र॰ पु॰ | दीव्यति | दीव्यतः | दीव्यन्ति |
| | म॰ पु॰ | दीव्यसि | दीव्यथः | दीव्यथ |
| | उ॰ पु॰ | दीव्यामि | दीव्यावः | दीव्यामः |
| लोट् | प्र॰ पु॰ | दीव्यतु | दीव्यताम् | दीव्यन्तु |
| | म॰ पु॰ | दीव्य | दीव्यतम् | दीव्यत |
| | उ॰ पु॰ | दीव्यानि | दीव्याव | दीव्याम |
| लङ् | प्र॰ पु॰ | अदीव्यत् | अदीव्यताम् | अदीव्यन् |
| | म॰ पु॰ | अदीव्यः | अदीव्यतम् | अदीव्यत |
| | उ॰ पु॰ | अदीव्यम् | अदीव्याव | अदीव्याम |
| विधिलिङ् | प्र॰ पु॰ | दीव्येत् | दीव्येताम् | दीव्येयुः |
| | म॰ पु॰ | दीव्येः | दीव्येतम् | दीव्येत |
| | उ॰ पु॰ | दीव्येयम् | दीव्येव | दीव्येम |
| लृट् | प्र॰ पु॰ | देविष्यति | देविष्यतः | देविष्यन्ति |
| | म॰ पु॰ | देविष्यसि | देविष्यथः | देविष्यथ |
| | उ॰ पु॰ | देविष्यामि | देविष्यावः | देविष्यामः |

05-10-2020

डॉ॰ निर्मल कुमार झा (स॰ प्राचार्य)
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ

साहित्यम्　　शास्त्री　　05-10-2020

छन्दविचार:

प्रश्न: → छन्दनिर्णयं कुरुत प्रदत्ते श्लोके ।

" मुक्तेषु रश्मिषु निरायतपूर्वकाया,
　　निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः ।
आत्मोद्धतैरपि रजोभिरलङ्घनीया,
　　धावन्त्यमी मृगजवाक्षमयेव रथ्याः ॥ "

उत्तरम् → प्रथमचरणे श्लोकस्य (पद्यस्य) यगणादि निर्णयः →

मुक्तेषु रश्मिषु निरायतपूर्वकाया
S S I　S I I　I S I　I S I　S S　।
तगण, भगण, जगण, जगण, गुरु, गुरु　।

प्रस्तुतस्य पद्यस्य प्रत्येके पादे चतुर्विंशति अक्षराः सन्ति । अस्मिन् पद्ये शक्वरी छन्दस्य भेदः वसन्ततिलका छन्दः अस्ति । तल्लक्षणमस्ति →

"उक्तावसन्ततिलका तभजा जगौगः ।"

पद्यस्य अन्येषु चरणेषु तगणादि क्रमः उपर्युक्तानुसारेणास्ति

05-10-2020

डॉ० निर्मल कुमार झा (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

संस्कृतसामान्यम् ।  उपशास्त्री I  05-10-2020

अनिवार्यप्रथमपत्रम्  संस्कृतानुवादः ।

दिनांक 04-10-2020 को दिए गए हिन्दीवाक्यों का संस्कृतानुवाद ।

"पृथक् विनानानाभिः तृतीयान्यतरस्याम् ।"

1. श्रमेण, श्रमात्, श्रमं विना विद्या न भवति ।
2. श्रमेण विना भोजनमपि दुष्प्राप्यं भवति ।
3. परिवारे, समाजे, राष्ट्रे, सर्वत्र श्रमस्य महत्त्वं दृश्यते ।
4. श्रमेण विना न विद्या भवति न च धनं भवति ।
5. छात्रजीवने श्रमस्याधिकं महत्त्वं वर्तते ।
6. जीवने कल्याणेच्छुकाः शैशवावस्थया एव श्रमं कुर्युः ।
7. कथितमस्ति यत् उद्यमेनैव कार्याणि सिद्ध्यन्ति, न तु मनोरथैः । सुप्तस्य सिंहस्य मुखे मृगाः न प्रविशन्ति ।

"उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः,
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।"

8. तात्पर्यमस्ति यत् सिंहसदृशः शक्तिशाली पशुरपि परिश्रमं करोति ।
9. श्रमं कृत्वा दशरथ मांझी पर्वतं छित्वा मार्गम् अनिर्मयत् ।
10. अद्य भवान् परिश्रमं करिष्यति तर्हि निश्चयेन एव फलं प्राप्स्यति ।

05-10-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ